# संस्कतवार्ता:

**दिनाङ्कः - 22/12/2024** **सायम् - 06:20**

**मुख्यवार्ताः**

- प्रधानमन्त्री नरेन्द्रमोदी अद्य कुवैत-देशस्य अमीर् शेख् मेशल् अल्-अहमद् अल्-जाबर् अल्-सबाह् इत्येतैः सह मेलनं विहितवान्।
- केन्द्रीय-गृह-मन्त्री अमितःशाह अद्य त्रिपुरायाः धलाई जनपदे हादूक्लाऊ स्थिते ब्रू-जनजातीय-जनानां पुनर्वास-क्षेत्रम् उपगतः।
- भारतेन जर्मनी -देशस्य मैगडेबर्ग-नगरे दुरापादितम् आक्रमणं निन्दितम्। अस्मिन् आक्रमणे पञ्चजन्नां मृत्युः अभवत्।
- पञ्जाबे गतसायं चंडीगढं निकषा मोहाली इत्यत्र एकस्य त्रितलयुतस्य भवनस्य विध्वंसेन जनद्वयं मृत्युमुपगतम्।
- भारतीय-महिला-कनीय-दलं, टी-20 एशियाकप प्रतिस्पर्धायाम्, प्रबलविजयेन उपाधिं प्राप्य इतिहासं कीर्तयामास ।

**प्रधानमंत्री- साक्षात्कार**

प्रधानमन्त्री नरेन्द्रमोदी अब्रवीत् यत्, भारत-कुवैत्-देशयोर्मध्ये इतिहासस्य, संस्कृतेः, परस्पर-सम्मानस्य च मूलभूताः बहु-पक्षीय-सम्बन्धाः सन्ति । एकस्मिन् कुवैत वार्तासंस्थायाः **'कुनायाः'** साक्षात्कारे वार्तालापं कुर्वन् श्रीमोदी अवोचत् यत् ऊर्जायाः, व्यापारस्य, निवेशस्य च क्षेत्रे दृढसम्बन्धः विस्तारितः अस्ति। सः अवदत् यत् व्यापारः वाणिज्यः च द्विपाक्षिक-सम्बन्धस्य महत्त्वपूर्णस्तम्भौ स्तः। ऊर्जा-सहभागित्वेन द्विपाक्षिकव्यापारे अद्वितीयं मूल्यं संवर्धितम् इति प्रधानमन्त्री अवदत्। सः न्यगदयत् यत्, औषधनिर्माणक्षेत्रे, स्वास्थ्यक्षेत्रे, प्रौद्योगिकीक्षेत्रे, प्रविधि क्षेत्रे , नवान्वेषणक्षेत्रे, वस्त्रक्षेत्रे च द्विपाक्षिकसहयोगस्य विस्तारस्य महती सम्भावना अस्ति। श्रीमोदी अवदत् यत्, जीवन्त-भारतीय-प्रवासिनः मैत्रीम् इतोऽपि सुदृढं कुर्वन्तः सन्ति। भारतस्य मृदुशक्तिः तस्य वैश्विक-प्रसारं कथं प्रभावयितुं शक्नोति इति प्रश्नस्य प्रत्युत्तरे प्रधानमन्त्री अवोचत् यत्, भारतस्य सभ्यतायाः लोकाचारः, परम्परा च तस्य मृदुशक्तेः आधारः अस्ति ।

प्रधानमन्त्री नरेन्द्रमोदी अद्य कुवैट्-देशस्य अमीर् शेख् मेशल् अल्-अहमद् अल्-जाबर् अल्-सबाह् इत्येतैः सह मेलनं विहितवान्। ते फार्मास्यूटिकल्स्, आई. टी., फिन्-टेक्, इन्फ्रास्ट्रक्चर्, सुरक्षा इत्यादिषु प्रमुखेषु क्षेत्रेषु सहकारस्य विषये चर्चां कृतवन्तः। एकस्मिन् सामाजिक- अंतर्जालीय - पटले श्रीमोदी अवोचत् यत् भारत-कुवैत्-देशयोः द्विपाक्षिक-सहभागित्वम् सामरिकरूपेण वर्धितम् अस्ति । सः आशां प्रकटितवान् यत् आगामिषु कालेषु मैत्री इतोऽपि वर्धिता भविष्यति इति।

**गृहमन्त्री त्रिपुरायाम्**

केन्द्रीय-गृह-मन्त्री अमितःशाह अद्य त्रिपुरायाः धलाई जनपदे हादूक्लाऊ स्थिते ब्रू-जनजातीय-जनानां पुनर्वास-क्षेत्रम् उपगतः। ब्रू-जनैः सह संवादे गृह-मन्त्रिणा आश्वासनं दत्तं यत् एतेषां जनानां पार्श्वे आयुष्मान-भारतप्रपत्रं नास्ति तेभ्यः शीघ्रं प्रपत्राणि दास्यन्ते। तेन जनेभ्यः प्रोदीरितं यत् देशे प्राशासनिकेषु श्रेणिबद्धेषु निजि-चिकित्सालयेषु च उपचाराय एकस्मै परिवाराय प्रतिवर्षं पञ्चलक्ष-रूप्यकाणि प्रदास्यन्ते। गृहमन्त्रिणा युलानः कौशल-विकास-प्रशिक्षणं प्राप्य नैजं व्यवसायं प्रारब्धुम् अध्यर्थितम्। अमुवा जीवने समृद्धिं प्राप्तये युवभ्यः शिक्षा-ग्रहणस्य लेने का आग्रहः कृतः। अवधेयं यत् गृहमन्त्री त्रिपुरायाः त्रिदिवसीय-यात्रारतो वर्तते।

**भारत-जर्मनी**

भारतेन जर्मनी -देशस्य मैगडेबर्ग-नगरे दुरापादितम् आक्रमणं निन्दितम्। अस्मिन् आक्रमणे पञ्चजन्नां मृत्युः अभवत्। द्विशताधिक-जनाश्च व्रणिताः। व्रणितेषु सप्त भारतीय-नागरिकाः अपि सम्मिलिताः सन्ति। जर्मनी स्थितं भारतीय-दूतावासः व्रणितानां सम्पर्के अस्ति। इयं घटना शुक्रवारे सायं तदा अभवत् यदा एकं कारयानं सम्मर्द-युते क्रिसमस आपणे प्रविष्टम्।

**पञ्जाब**

पञ्जाबे गतसायं चंडीगढं निकषा मोहाली इत्यत्र एकस्य त्रितलयुतस्य भवनस्य विध्वंसेन जनद्वयं मृत्युमुपगतम्। मोहाली क्षेत्रस्य उपायुक्तेन विराज-तिड़के इत्यनेन अस्माकं संवाददात्रे प्रोक्तं यत् गतसायं कालादेव साहाय्योद्धारकार्यं प्रवर्तते। तेन जनाः सहयोगाय अध्यर्थिताः येन साहाय्योद्धार-कार्यं शीघ्रं भवेत्। अस्यां घटनायाम् इदानीमपि न्यूनान्न्यूनं पञ्चदश जनाः इतोपि भग्नावशेषे वर्तन्ते इति आशङ्क्यते।

**ऋतु विज्ञान**

भारतीय ऋतु विज्ञान-विभागेन अद्य हिमाचल, जम्मू-काश्मीर, लद्दाख, गिलगित्-, बाल्टिस्तन , मुजफ्फराबादस्य च केषुचित् क्षेत्रेषु शैत्यतरङ्गस्य पूर्वानुमानं कृतम्। भारतीय ऋतु विज्ञान-विभागस्यानुसारं अद्य ओडिशा-राज्ये, उप-हिमालयी-पश्चिमवङ्गदेशे, सिक्किम्-राज्ये, मणिपुरे च रात्रौ प्रातःकाले च धूमिका भवितुम् अर्हति। देहली-एन्. सी. आर्. क्षेत्रे आगामिदिवसेषु सायङ्काले रात्रौ च धूमाच्छादः, अल्पधूमिका भवितुम् अर्हति इति ऋतु विभागेन संसूचितम्।

**महाराष्ट्रे विभागाबण्टनम्**

महाराष्ट्रे मन्त्रिभ्यः विभागाबण्टनं सञ्जातम्। मुख्यमन्त्रिणा देवेन्द्र-फड़णवीसेन गृहमन्त्रालयः ऊर्जा, विधि-न्यायपालिका, सार्वजनिक-प्रशासनं सूचना-प्रचार-विभागश्च स्वस्य पार्श्वे संरक्षिताः। शिवसेना-नेत्रे उप-मुख्यमन्त्रिणे एकनाथ-शिंदे इत्यस्मै नागर-विकास आवास-लोक-सेवा-विभागश्च प्रदत्ताः। राष्ट्रवादी कांग्रेस-दलस्य नेत्रे उप-मुख्यमन्त्रिणे अजित-पवाराय आबकारी वित्त-योजना-मंत्रालयाः प्रदत्ताः। भाजपादलस्य प्रदेशाध्यक्षाय चन्द्रशेखर-बावनकुले इत्यसौ राजस्व-मन्त्रिपदं प्रदत्तम्। भाजपेति दलस्य राधाकृष्ण-विखे-पाटिलाय जल संसाधन-विभागः चंद्रकांत-पाटिलाय उच्चशिक्षा अथ च प्रौद्योगिकी-शिक्षा-मन्त्रालयः गिरीश-महाजनाय जल-संसाधन-मन्त्रालयः एनसीपी दलस्य हसन मुशरिफ इत्यस्मै च चिकित्सा-शिक्षा-मन्त्रालयः प्रदत्ताः।

**उप-राष्ट्रपतिः**

उप-राष्ट्रपतिः जगदीप-धनखड़ः अवोचत् यत् कृषिः ग्रामीण-विकासस्य धुरी अस्ति। यावत् ग्रामीण- परिदृश्यं नैव परिवर्तिष्यते तावत् देशः विकसितं नैव भवितुं शक्नोति। अद्य राजधान्यं नवदिल्याम् ऐषमः चौधरी-चरण-सिंह-पुरस्कार-विजेतृभिः सह संवादे श्री-धनखड़-वर्येण उक्तं यत् ग्रामीणार्थव्यवस्था केवलं तदैव संवर्धिष्यते यदा कृषकः तेषां कुटुम्बिनश्च विपणन-मूल्य-संवर्धने संलग्नाः स्युः संकुलं च आत्मनिर्भराः भवन्तु।

उप-राष्ट्रपतिना ग्रामीणविकासं कृषकाणां कल्याणं समावेशी-विकासं च प्रति चौधरी-चरण-सिंहस्य अथकसमर्पणं संस्मृत्य तस्य असाधारण-रिक्थस्य प्रशंसा कृता। भारतस्य आर्थिक-स्थितेः उल्लेखं विदधता श्रीधनखड़वर्यः अवोचत् यत् भारतं सम्प्रति जगतः पञ्चमी सर्वतो बृहत् अर्थव्यवस्था वर्तते जापानं जर्मनीं च पश्चीकृत्य तृतीया सर्वतो बृहत् अर्थव्यवस्था भवितुं मार्गे अग्रसरः वर्तते।

**प्रधानमन्त्री रविचन्द्रन् आश्विन्**

प्रधानमन्त्री नरेन्द्रमोदी रविचन्द्रन् आश्विन् इत्यस्मै भावपूर्णं मुक्तं पत्रं अलिखत् , क्रिकेट्-क्रीडायां अथ देशे च तस्य अनुकरणीय-योगदानाय धन्यवादं च अयच्छत्। प्रसिद्धः आफ़्-स्पिन्नर् डिसेम्बर् मासस्य अष्टादशदिनाङ्के अंताराष्ट्रीय क्रिकेट् क्रीडात: निवृत्तिं घोषितवान्।

बोर्डर्-गावस्कर्-ट्रोफी-क्रीडायाः मध्यभागे, अश्विनः आकस्मिक-निवृत्तिः सम्पूर्णे विश्वे क्रिकेट्-प्रशंसकेभ्यः आघातं अजनयत्। स्वकीये हृदयस्पर्शी पत्रे, प्रधानमन्त्री मोदी, अश्विनः निवृत्तेः घोषणाम् तस्य विशिष्टया "कैरोम्-बाल्" इत्यस्य कन्दुकप्रक्षेपन-शैल्या सह उपमानं अकरोत् , य: सर्वेभ्यः आश्चर्यम् अजनयत्।

**महिला-टी-20**

भारतीय-महिला-कनीय-दलं, सम्पूर्णे षट्-दल-प्रतियोगितायां अपराजितं भूत्वा, प्रबलविजयेन उपाधिं प्राप्य इतिहासं कीर्तयामास । मलेशिया-देशस्य कौलालंपुर्-नगरे, अन्तिम-स्पर्धायां बाङ्ग्लादेश्-देलं एकचत्वारिंशत् अंकेन पराज्जय, भारतीय दलं ए. सी. सी.-अण्डर् -19 महिला-टी-20 एशिया-कप् इति उपाधिम् अवाप्नोत्।

**।।इति वार्ता:।।**